# Govindam AdipuruSham Stotram

# ગોવિન્દમાદિપુરુષસ્તોત્રમ્

## Document Information

Text title : Govindam Adipurusham Stotram

File name : govindamAdipuruShastotram.itx

Category : vishhnu, krishna, stotra

Location : doc_vishhnu

Description/comments : brahmasaMhitA 51, 29-56

Latest update : October 17, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2024

*sanskritdocuments.org*

# ગોવિન્દમાદિપુરુષસ્તોત્રમ્

(બ્રહ્મસંહિતાન્તર્ગતમ્)
ઈશ્વરઃ પરમઃ કૃષ્ણઃ સચ્ચિદાનન્દવિગ્રહઃ ।
અનાદિરાદિર્ગોવિન્દઃ સર્વકારણકારણમ્ ॥ ૧॥ (૧)

ચિન્તામણિપ્રકરસદ્મસુ કલ્પવૃક્ષ-
લક્ષાવૃતેષુ સુરભીરભિપાલયન્તમ્ ।
લક્ષ્મીસહસ્રશતસમ્ભ્રમસેવ્યમાનં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨॥ (૨૯)

વેણું ક્વણન્તમરવિન્દદલાયતાક્ષં
બર્હાવતંસમસિતામ્બુદસુન્દરાઙ્ગમ્ ।
કન્દર્પકોટિકમનીયવિશેષશોભં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૩॥

આલોલચન્દ્રકલસદ્વનમાલ્યવંશી-
રત્નાઙ્ગદં પ્રણયકેલિકલાવિલાસમ્ ।
શ્યામં ત્રિભઙ્ગલલિતં નિયતપ્રકાશં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૪॥

અઙ્ગાનિ યસ્ય સકલેન્દ્રિયવૃત્તિમન્તિ
પશ્યન્તિ પાન્તિ કલયન્તિ ચિરં જગન્તિ ।
આનન્દચિન્મયસદુજ્જ્વલવિગ્રહસ્ય
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૫॥

અદ્વૈતમચ્યુતમનાદિમનન્તરૂપં
આદ્યં પુરાણપુરુષં નવયૌવનં ચ ।
વેદેષુ દુર્લભમદુર્લભમાત્મભક્તૌ
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૬॥

પન્થાસ્તુ કોટિશતવત્સરસમ્પ્રગમ્યો
વાયોરથાપિ મનસો મુનિપુઙ્ગવાનામ્ ।
સોઽપ્યસ્તિ યત્પ્રપદસીમ્ન્યવિચિન્ત્ય તત્ત્વે
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૭॥

એકોઽપ્યસૌ રચયિતું જગદણ્ડકોટિં
યચ્છક્તિરસ્તિ જગદણ્ડચયે યદન્તઃ ।
અણ્ડાન્તરસ્થપરમાણુચયાન્તરસ્થં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૮॥

યદ્ભાવભાવિતધિયો મનુજાસ્તથૈવ
સમ્પ્રાપ્યરૂપમહિમાસનયાનભૂષાઃ ।
સૂક્તૈર્યમેવ નિગમપ્રથિતૈઃ સ્તુવન્તિ
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૯॥

આનન્દચિન્મયરસપ્રતિભાવિતાભિ-
સ્તાભિર્ય એવ નિજરૂપતયા કલાભિઃ ।
ગોલોક એવ નિવસત્યખિલાત્મભૂતો
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૦॥

પ્રેમાઞ્જનચ્છુરિતભક્તિવિલોચનેન
સન્તઃ સદૈવ હૃદયેષુ વિલોકયન્તિ ।
યં શ્યામસુન્દરમચિન્ત્યગુણસ્વરૂપં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૧॥

રામાદિ મૂર્તિષુ કલાનિયમેન તિષ્ઠન્
નાનાવતારમકરોદ્ભુવનેષુ કિન્તુ ।
કૃષ્ણઃ સ્વયં સમભવત્ પરમઃ પુમાન્ યો
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૨॥

યસ્ય પ્રભા પ્રભવતો જગદણ્ડકોટિ-
કોટિષ્વશેષવસુધાદિવિભૂતિભિન્નમ્ ।
તદ્બ્રહ્મ નિષ્કલમનન્તમશેષભૂતં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૩॥

માયા હિ યસ્ય જગદણ્ડશતાનિ સૂતે
ત્રૈગુણ્યતદ્વિષયવેદવિતાયમાના ।

સત્ત્વાવલમ્બિપરસત્ત્વવિશુદ્ધસત્ત્વં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૪॥

આનન્દચિન્મયરસાત્મકતયા મનઃસુ
યઃ પ્રાણિનાં પ્રતિફલં સ્મરતામુપેત્ય ।
લીલાયિતેન ભુવનાનિ જયત્યજસ્રં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૫॥

ગોલોકનામ્નિ નિજધામ્નિ તલે ચ તસ્ય
દેવિ મહેશહરિધામસુ તેષુ તેષુ ।
તે તે પ્રભાવનિચયા વિહિતાશ્ચ યેન
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૬॥

સૃષ્ટિસ્થિતિપ્રલયસાધનશક્તિરેકા
છાયેવ યસ્ય ભુવનાનિ બિભર્તિ દુર્ગા ।
ઇચ્છાનુરૂપમપિ યસ્ય ચ ચેષ્ટતે સા
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૭॥

ક્ષીરં યથા દધિવિકારવિશેષયોગાત્
સઞ્જાયતે નહિ તતઃ પૃથગસ્તિ હેતોઃ ।
યત્સમ્ભૂતમપિ તથા સમુપૈતિ કાર્યાદ્
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૮॥

દીપાર્ચિરેવ હિ દશાન્તરમભ્યુપેત્ય
દીપાયતે વિવૃતહેતુસમાનધર્મા ।
યસ્તાદૃગેવ હિ ચ વિષ્ણુતયા વિભાતિ
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૧૯॥

યઃ કારણાર્ણવજલે ભજતિ સ્મ યોગ-
નિદ્રામનન્તજગદણ્ડસરોમકૂપઃ ।
આધારશક્તિમવલમ્બ્ય પરં સ્વમૂર્તિં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૦॥

યસ્યૈકનિઃશ્વસિતકાલમથાવલમ્બ્ય
જીવન્તિ લોમવિલજા જગદણ્ડનાથાઃ ।
વિષ્ણુર્મહાન્ સ ઇહ યસ્ય કલાવિશેષો
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૧॥

ભાસ્વાન્યથાશ્મશકલેષુ નિજેષુ તેજઃ
સ્વીયં કિયત્પ્રકટયત્યપિ તદ્વદત્ર ।
બ્રહ્મા ય એષ જગદણ્ડવિધાનકર્તા
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૨॥

યત્પાદપલ્લવયુગં વિનિધાય કુમ્ભ-
દ્વન્દ્વે પ્રણામસમયે સ ગણાધિરાજઃ ।
વિઘ્નાન્વિહન્તુમલમસ્યજગત્ત્રયસ્ય
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૩॥

અગ્નિર્મહીગગનમમ્બુમરુદ્દિશાશ્ચ
કાલસ્તથાત્મમનસીતિ જગત્ત્રયાણિ ।
યસ્માત્ભવન્તિ વિભવન્તિ વિશન્તિ યં ચ
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૪॥

યચ્ચક્ષુરેષ સવિતા સકલગ્રહાણાં
રાજા સમસ્તસુરમૂર્તિરશેષતેજઃ ।
યસ્યાજ્ઞયા ભ્રમતિ સમ્ભૃતકાલચક્રો
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૫॥

ધર્મોઽથ પાપનિચયઃ શ્રુતયસ્તપાંસિ
બ્રહ્માદિકીટપટગવાદયશ્ચ જીવાઃ ।
યદ્દત્તમાત્રવિભવપ્રકટપ્રભાવા
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૬॥

યસ્ત્વિન્દ્રગોપમથવેન્દ્રમહો સ્વકર્મ-
બન્ધાનુરૂપફલભાજનમાતનોતિ ।
કર્માણિ નિર્દહતિ કિન્તુ ચ ભક્તિભાજાં
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૭॥

યં ક્રોધકામસહજપ્રણયાદિભીતિ-
વાત્સલ્યમોહગુરુગૌરવસેવ્યભાવૈઃ ।
સઞ્ચિન્ત્ય તસ્ય સદૃશીં તનુમાપુરેતે
ગોવિન્દમાદિપુરુષં તમહં ભજામિ ॥ ૨૮॥ (૫૫)

શ્રિયઃ કાન્તાઃ કાન્તઃ પરમપુરુષઃ કલ્પતરવો

દ્રુમા ભૂમિશ્ચિન્તામણિગણમયિ તોયમમૃતમ્ ।
કથા ગાનં નાટ્યં ગમનમપિ વંશી પ્રિયસખિ
ચિદાનન્દં જ્યોતિઃ પરમપિ તદાસ્વાદ્યમપિ ચ ।
સ યત્ર ક્ષીરાબ્ધિઃ સ્રવતિ સુરભીભ્યશ્ચ સુમહાન્
નિમેષાર્ધાખ્યો વા વ્રજતિ ન હિ યત્રાપિ સમયઃ ।
ભજે શ્વેતદ્વીપં તમહમિહ ગોલોકમિતિ યં
વિદન્તસ્તે સન્તઃ ક્ષિતિવિરલચારાઃ કતિપયે ॥ ૨૯॥ (૫૬)

ઇતિ ગોવિન્દમાદિપુરુષસ્તોત્રં સમ્પૂર્ણમ્ ।

The numbers in parenthesis correspond
to verse numbers in the 5th chapter
of the Brahmasamhita.

*Govindam AdipuruSham Stotram*

pdf was typeset on October 17, 2024

Please send corrections to *sanskrit@cheerful.com*